जुहोतीनां कोविशेषः" कात्या० श्रौ० १।२।५। इति प्रश्ने यजतिलक्षणमुक्त्वा "उपविष्टहोमाः स्वाहाकारप्रदाना जुहोतयः" १।२।७इति लक्षितम्। "उपविष्टेन कर्त्रा होमो येषु त उपविष्टहोमाः स्वाहाकारेण प्रदानं येषु ते स्वाहाकारप्रदानाः य उपविष्टहोमाः स्वाहाकारप्रदानाश्च ते जुहोतयः इत्युच्यन्ते" कर्कः अतोऽस्य पुंस्त्वमेव स्त्रीत्वोक्तिः प्रामादिकी। "क्षरन्ति सर्वा वैदिक्यो जुहोतियजतिक्रियाः" मनुः।

**जुह्वास्य** पु० जुहूरास्यमिवास्य। होमीयवह्नौ। "हव्यवाहो जुह्वास्यः" ऋ० १।१२।६। [जूतः।

**जू** गतौ सौत्र० सक० प० सेट्। जवति अजावीत् जुजाव।

**जू** स्त्री सौ०जू—गतौ यथायथं कर्त्तृ भावादौ क्विप्। १आकाशे २सरस्वत्यां ३पिशाच्यां च ४जवने शब्दरत्ना० ५जवयुक्ते त्रि० विश्वः। ६त्वरागमने ७गमने च स्त्री मेदि०।

**जूट** पु०जट—संहतौ अच्—पृषो०।१जटासंहतौ बन्धे २जटायाम् शब्दार्थचि०। "जटाजूटसमायुक्तामर्द्धेन्दुकृतशेखराम्" दुर्गाध्यानम्। "भूतेशस्य भुजङ्गवल्लिवलयस्रङ्नद्धजूटाजटाः" मालतीमा०। स्वार्थे क तत्रार्थे।

**जूत** त्रि० सौ०जू—क्त। १गते २आकृष्टे च। "रथो ह वा भूतजात्यभिजूतः" ऋ० ३।५८।८। "अभिजूतः स्तोतृभिराकृष्टः" भा०। ३दत्ते च "युवं श्वेतं पेदव इन्द्रजूतम्" ऋ०१।११८।६। "इन्द्रजूतं इन्द्रेण जूतं दत्तम्" भा०।

**जूति** स्त्री जु—रंहसि भावे क्तिन् सातिहेतीत्यादिना नि०। १वेगे अमरः। "उत स्मास्य पनयन्ति जना जूतिं कृष्टिप्रो अभिभूतिमाशाः" ऋ० ४।३८।६ "मनो जूतिर्जुषताम्" यजु०२।१६। "जूतिः जवतेर्गतिकर्म्मणः" वेददी०। अत्र मनो ज्योतिः इति पाठः प्रामादिकः। मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः" ऐ० उ० "जूतिश्चेतसो रुजादिदुःखित्वाभावः" २भाष्योक्तोऽर्थे च।

**जूतिका** स्त्री जूत्या कायति कै—क। कर्पूरभेदे राजनि०।

**जूर** वयोहानौ अक० बधे सक० दिवा० आत्म० सेट्। जूर्य्यते अजूरिष्ट। ईदित्। जूर्णः। कोपे च "इच्छाविभङ्गाकुलमानसत्वात् भर्त्रे गतेश्च्यव चिरं जुजूरे" भट्टिः।

**जूर्ण** पु० जूर—क्त। (उलुखड़) तृणभेदे रत्नमालायां जूर्णाख्येति तत्पर्य्याये निर्द्देशात् तस्य तथात्वम्। जूर्णेति आख्या यस्य जूर्णाख्योऽप्यत्र।

**जूर्णाह्वय** पु० जूर्णमाह्वयते नामत्वेन स्पर्द्धते आ+ह्वे—बा० श। देवधान्ये (देधान) हेमच०।

**जूर्णि** स्त्री ज्वर—रोगे नि०अट् जूर—वेगे वा नि०। १स्त्रीरोगे २वेगे। ३आदित्ये ४देहे ५ब्रह्मणि च संक्षि०उणा०। जूर कोपे नि०। ६क्रोधे निघण्टुः निरुक्ते ६।४।२। "अस्यानिरुक्तिरन्या दर्शिता "जूर्णिर्जवतेर्वा द्रवतेर्वा दुनोतेर्वा" तत्र पृषो०। तेन ७वेगयुते ८द्रवयुते ९तापके च। "क्षिप्रा जूर्णिर्न वक्षति" ऋ०१।१२६।८। "जूर्णिर्वेगवती सेना" भा०। १०स्तुतिकुशले च। "ऋष्वाणां जूर्णिर्होता ऋषूणाम्" ऋ०१।१२७।१०। "जूर्णिः स्तुतिकुशलः" भा०।

**जूर्त्ति** स्त्री ज्वर—भावे क्तिन् ऊठ्। ज्वरे।

**जूर्य्य** त्रि० जूर—कर्त्तरि बा०ण्यत्। १जीर्णे "रथः पुरीव जूर्य्यः" ऋ० ६।२।७। "जूर्य्यः जीर्णः" भा० २छद्मे च।

**जूष** बधे भ्वा० उभ०सक०सेट्। जूषति ते अजूषीत् अजूषिष्ट जुजूष षे। जूषः।

**जूष** पु'न० यूष+पृषो०। मुद्गादिक्वाथे भरतः।

**जूषण** न० जूष—ल्यु। वृक्षभेदे (धाइफुल) शब्दच०।

**जॄ** न्यक्कारे भ्वा० पर० सक० अनिट्। जरति अजार्षीत्। जजार।

**जृभ** जृम्भे (हाइतोला) गात्रशैथिल्ये च भ्वा० आत्म०अक० सेट् इदित्। जृम्भते अजृम्भिष्ट। जजृम्भे। "आत्मानमाधाय मधुर्जजृम्भे" कुमा० जृम्भा जृम्भः। जृम्भितः। "जृम्भते मुहुरासीना बाला गर्भभरालसा" सा० द०।

**जृभ** जृम्भणे भ्वा० आ० अक० सेट्। जृभते अजृभिष्ट जजृभे। ईदित्। जृब्धः।

**जृम्भ** पुं'न०जृभि—भावे घञ् अर्द्धर्चा०(हाइतोला)१गात्रशैथिल्यापादके २मुखविकाशकारके च व्यापारभेदे। भावे अ। तत्रार्थे स्त्री। जृम्भा च श्रमगर्भादिजनितजाड्यकायत्री यथाह सा०द० "आलस्यं श्रमगर्भाद्यैर्जाड्यं जृम्भासितादिकृत्" तत्कारकवायुश्च देवदत्तः। "विजृम्भणे देवदत्तः शुद्धस्फटिकसन्निभः" पदार्थादर्शे योगार्णवः। "क्षुतोत्पन्नजृम्भासु जीवोच्चिष्टाङ्गुलिध्वनिः। गुरोरपि च कर्त्तव्यमन्यथा ब्रह्महा भवेत्"तिथित०। ३विकाशे ४विस्फारे च पु० शब्दच०। "पीत्वैकं श्वासमनिलः पुनस्त्यजति वेगवान्। आलस्यनिद्रायुक्तस्य स जृम्भ इति कथ्यते" "जृम्भात्यर्थं समीरणात्। जृम्भावेगे समुत्पन्ने शोभने शयने नरम्। स्वापयेत् तेन नियमात् जृम्भावेगः प्रशाम्यति। जृम्भावेगक्षयं याति वातुतैलेन मर्द्दनात्। भोजनात् स्वादुभोज्यानां तथा ताम्बूलभक्षणात्" वैद्यकम्।

**जृम्भक** त्रि० जृम्भ—ण्वुल्। १जृम्भाकारके २रुद्रगणभेदे पु०